শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রীমন্মহাভারতে

# ॥শ্রীকৃষ্ণদ্বাদশনামস্তোত্রম্ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ

# ॥ শ্রীকৃষ্ণদ্বাদশনামস্তোত্রম্ ॥

শ্রীকৃষ্ণ উৱাচ
কিং তে নামসহস্রেণ ৱিজ্ঞাতেন তৱার্জুন।
তানি নামানি ৱিজ্ঞায নরঃ পাপৈঃ প্রমুচ্যতে॥ ১ ॥

প্রথমে তু হরিং ৱিদ্যাত্ দ্বিতীযং কেশৱং তথা।
তৃতীযং পদ্মনাভং চ চতুর্থং ৱামনং স্মরেত্॥ ২ ॥

পঞ্চমং ৱেদগর্ভং চ ষষ্ঠং চ মধুসূদনম্।
সপ্তমং ৱাসুদেৱং চ ৱরাহং চাষ্টমং তথা॥ ৩ ॥

নৱমং পুণ্ডরীকাক্ষং দশমং হি জনার্দনম্।
কৃষ্ণমেকাদশং ৱিদ্যাত্ দ্বাদশং শ্রীধরং তথা॥ ৪ ॥

দ্বাদশৈতানি নামানি ৱিষ্ণুপ্রোক্তান্যনেকশঃ।
সাযংপ্রাতঃ পঠেন্নিত্যং তস্য পুণ্যফলং শৃণু॥ ৫ ॥

চান্দ্রাযণসহস্রাণি কন্যাদানশতানি চ।
অশ্বমেধসহস্রাণি ফলং প্রাপ্নোত্যসংশযঃ॥ ৬ ॥

অমাযাং পৌর্ণমাস্যাং চ দ্বাদশ্যাং তু ৱিশেষতঃ।
প্রাতঃকালে পঠেন্নিত্যং সর্ৱপাপৈঃ প্রমুচ্যতে॥ ৭ ॥

॥ ইতি শ্রীকৃষ্ণদ্বাদশনামস্তোত্রং সংপূর্ণম্ ॥